दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-245

1 28.06.2024 शुक्रवासरः वि.सं. २०८० आषाढ़कृष्णषष्ठी आषाढः 13 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# राष्ट्रपतिः द्रौपदी मुर्मू संसदः उभे सदने संयुक्तोपवेशने सम्बोधितवती



**हिमसंस्कृतवार्ताः।** राष्ट्रपतिः द्रौपदी मुर्मूः संसदः उभे सदने संयुक्तोपवेशने सम्बोधितवती। सा अवदत् अद्यतन परीक्षापत्रस्रवणस्य घटनाम् अन्वेषयितुम् अपराधिनः दण्डयितुम् च सर्वकारः प्रतिबद्धः अस्ति। राष्ट्रपतिः द्रौपदी मुर्मूः उक्तवती यत् परीक्षापत्रस्रवणस्य निष्पक्षतया परीक्षणाय दोषिभ्यक्ष कठोरः दण्डः स्यात्। एतदर्थं प्रशासनं प्रतिबद्धम् अस्ति। राष्ट्रपतिः अवदत् यत् प्रतियोगि-परीक्षा भवेत् अथवा सर्वकारीयनियुक्तिप्रक्रिया स्यात् सर्वेषु विषयेषु पूर्णपारदर्शितायाः, सत्यनिष्ठतायाः आवश्यकता वर्तते। मम प्रशासनम् एतादृशानां चिन्ताप्रदानां परीक्षा- पत्राणाम् प्राकासारण- घटनानां निष्पक्षतया अन्वेषणं कृत्वा अपराधिभ्यः कठोरं दण्डं दातुं प्रतिबद्धम् अस्ति। परीक्षासु अनियमिततानां विरोधे संसदा अपि कठोरम् संविधानम् निर्मितम्। राष्ट्रपतिः मुर्मूः उक्तवती यत् जम्मू-कश्मीरस्य जनाः सद्यः सम्पन्ने लोकसभानिर्वाचने मतदानानि दत्वा देशस्य शत्रुभ्यः समुचितं उत्तरं दत्तवन्तः। कश्मीर उपत्यकायां मतदानेन बहुदशकानां मतदानस्य अभिलेखाः भग्नाः जाताः। संशोधन- प्रदर्शन- परिवर्तनानाम् सङ्कल्पेन भारतस्य द्रुततरा वर्धमाना अर्थव्यवस्था कृता इति उक्तवती। राष्ट्रपतिः द्रौपदी मुर्मूः। राष्ट्रपतिः द्रौपदी मुर्मूः उक्तवती यत् संशोधनस्य, प्रदर्शनस्य, परिवर्तनस्य च संकल्पेन भारतं विश्वस्य द्रुततरा वर्धमाना अर्थव्यवस्थारूपेण जातम्।

## राष्ट्रपति-नारी-सशक्तिकरणे किम् अवदत्

नारी सशक्तिकरण विषये राष्ट्रपतिः प्रोक्तवती यतः नारी-नेतृत्वे विकासः दरीदृश्यते। नारी-शक्ति-वन्दन-अधिनियमे लोकसभायां राज्य-सभायाम् च आरक्षणेन एतत्।

## राज्यसभायां निर्वाचितानां नूतनसांसदानां शपथवचनम्




गुरुवासरे बिहार-झारखण्ड-मध्यप्रदेश राज्याणां नवनिर्वाचिताः षड् सांसदाः राज्यसभायाः सदस्यत्वेन शपथं गृहीतवन्तः। राज्यसभायाः अध्यक्षः जगदीप-धनखड़े एतान् नवनिर्वाचितान् सांसदः शपथवचनं दापितवान्। कांग्रेसदलस्य सासदः अखिलेश-प्रसाद-सिंहः झारखण्ड- मुक्ति-मोर्चा इत्यस्य नेता डी. सरफराज अहमदः भारतीय जनता पार्टीति-दलस्य नेता प्रदीप कुमार वर्मा, बंशीलाल गुर्जर, माया नारोलिया बालयोगी उमेशनाथः च उच्चसदनस्य सदस्यरूपेण शपथं गृहीतवन्तः।

## केन्द्रीय-अन्वेषण-प्रभागेन नीटप्रपत्रप्रकरणे द्वौ जनौ निगृहीतौ



केन्द्रीय-अन्वेषण प्रभागेन द्वौ-परीक्षा-पत्र-सवस्य प्रकरणे द्वौ जनौ निगृहीतौ। वार्ताहरेण सूचितं यत् एतौ आरोपिणौ बिहारे पटनाततः निगृहीतौ।

## महाराष्ट्र-विधानसभायां प्रथमे दिने विपक्षीदलस्य विरोधप्रदर्शनम्



महाराष्ट्र-राज्ये विधानसभायाः प्रावृट-सत्रस्य प्रथम-दिने विपक्षि दलेन ऋणक्षमा-प्राकृतिक आपदाभिः प्रभावितानां कृषकाणां समस्यानां विषये विरोध-प्रदर्शनं कृतः। विधानसभायां विपक्षस्य नेता विजय वडेट्टीवारः कांग्रेस-दलस्य नेता जगताप, रवीन्द्र धांगेकर, अनिल-देशमुखः च अनेकेषु विषयेषु सर्वकारस्य आलोचनां कृतवन्तः।

## अमरीकी-कांग्रेस-दलस्य निम्न सदनेन पाकिस्ताने जायमानः सामान्य निर्वाचनस्य स्वतन्त्रान्वेषणस्य प्रस्तावः पारितः



अमरीकी-कांग्रेस-दलस्य निम्न सदनेन पाकिस्ताने जायमानस्य सामान्य-निर्वाचनस्य स्वतन्त्र-अन्वेषणस्य प्रस्तावः स्वीकृतः। पाकिस्ताने लोकतन्वाय मानवाधिकारं प्रति च समर्थानाय प्रदीयमाने प्रस्तावे चतुर्विंशत्याधिक द्विसहखतं वर्षस्य सामान्य-निर्वाचने अनियमिततायाः प्रकरणे स्वतन्त्र, निष्पक्ष च निर्वाचनस्य महत्व-विषये बलं प्रदत्तम्। अत्रान्तरे प्रस्तावे विषये प्रतिक्रियां प्रकटयन् पाकिस्तानस्य रक्षामन्त्री अस्य आलोचनां कृतवान्। एषः प्रस्तावः पञ्चाशितिः प्रतिशतं सदनस्य सदस्यानां सहयोगेन स्वीकृतः। अष्टनवतिः प्रतिशतं सदस्यैः अस्य समर्थनन मतदानं कृतम्। पाकिस्ताने अस्मिन् वर्षे फरवरी मासस्य अष्ट-दिनांक सामान्य-निर्वाचनम् कारितम्।

## नवदेहल्यां 'भारते वन हेल्थ इत्यस्य गतिविधये विधि-पर्यावरण-आकलने राष्ट्रीय-परामर्शः' इत्यस्मिन् विषये द्विदिवसीय कार्यशालायाः उद्घाटनम्



हिमसंस्कृतवार्ताः। नीति-आयोगस्य सदस्यः डॉ.वी. के. पॉल इत्यनेन नवदिल्ल्या स्वास्थ्य-परिवार-कल्याण मन्त्रालस्य सचिवः अपूर्व-चन्द्रा इत्यस्य उपस्थितौ द्विदिवसीय कार्यशालायाः उद्घाटनं कृतवान्। कार्यशालायाः शीर्षकं 'भारते वन हेल्थ इत्यस्य गतिविधये विधि-पर्यावरण-आकलने राष्ट्रीय-परामर्शः' इति अस्ति। कार्यशालायाः मुख्य उद्देश्यं अस्ति यत् वन हेल्थ इत्यस्य गतिविधिं प्रभावयितुं करणस्य उपलब्ध-विधिनां आकलनं सम्मिलितः अस्ति इति।

## ऋतु-विज्ञान-विभागेन मध्यमा-वृष्ट्याः पूर्वानुमानं कृतम्

ऋतु-विज्ञान-विभागेन अद्य जम्मू-कश्मीर, लद्दाख, गिलगित-बाल्टिस्तानः, मुजफ्फराबादः, हिमाचलप्रदेशः, पंजाब, हरियाणा, चंडीगढ़, पश्चिमी-राजस्थानः एतेषु राज्येषु मध्यमा वृष्टयाः पूर्वानुमानं कृतवान्। विभागस्य अनुसारेण असम, मेघालय, अंडमान-निकोबार द्वीप-समूह, पश्चिम-बंगाल, सिक्किम, बिहार च राज्येषु अतिवृष्टयः संभावनं व्यक्ता। विभागेन प्रोक्तं यत् आगामि दिवसात् जूनमासस्य त्रिंशत् दिनांक पर्यन्तं झारखण्डः, ओडिशा, उत्तराखण्डः, पूर्वी-राजस्थानः, पूर्वी-पश्चिमी उत्तरप्रदेशः, हिमाचलप्रदेशः, हरियाणा, पंजाब च राज्येषु अवधानेन अतिवृष्टेयः सम्भावना अस्ति।

## सुभाषितम्

**क्षणशः कणशश्चैव**
**विद्याम् अर्थं च चिन्तयेत्।**
**क्षणत्यागे कुतो विद्या**
**कणत्यागे कुतो धनम्॥**

भावार्थ- क्षण-क्षण करके विद्या का चिन्तन करना चाहिए, कण- कण करके धन का उपार्जन करना चाहिए। क्षण त्यागने पर विद्या कहाँ और कण त्यागने पर धन कहाँ?

✍ प्रतीकसाठ्ये मुम्बई

## हिमसंस्कृतवार्ताः सामान्यज्ञानम्

**प्र. सौरमण्डलस्य बृहत्तमः ग्रहः कः?**
उत्तर : बृहस्पतिः
**प्र. भारते सर्वाधिकवृष्टिः कुत्र अस्ति?**
उत्तर : माउनसिनराम (मेघालयः)
**प्र. विद्युतदीपस्य आविष्कारकः कः?**
उत्तर : थामसएडिसन
**प्र. ............... प्राथमिकवर्णाः भवन्ति ?**
उत्तर : रक्त-नील-पीतश्च
**प्र.विश्वस्वास्थ्यसंगठनस्य मुख्यालयःकुत्र ?**
उत्तर : जेनेवा

शिवानी शर्मा, हिमसंस्कृतवार्ताः

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## लालकृष्ण आडवाणी एम्सचिकित्सालयात् अवकाशं प्राप्तवान्, सम्यकस्ति तस्य स्वास्थ्यम्

हिमसंस्कृतवार्ताः। भारतीय जनता पार्टीति दलस्य वरिष्ठ नेता लालकृष्ण आडवाणी अखिल भारतीय आयुर्विज्ञान संस्थाने गतरात्रौ स्वास्थ्य-विकृति कारणात् चिकित्सायां आसीत्। सम्प्रति ततः अवकाश प्रदत्तः। भारतीय आयुर्विज्ञान संस्थानेन (एम्स) उक्तं यत वृद्धावस्थावशात् स्वास्थ्य-समस्या-समागता अस्ति। सम्प्रति सम्यक् निरीक्षणाधीनम् च स्वास्थ्यम् अस्ति।

## देहल्याः जलमन्त्री अतिशी चिकित्सालयात् आनीता

हिमसंस्कृतवार्ताः। दिल्ल्याः जलमंत्रिणा आतिश्याः लोकनायक जयप्रकाश नारायण-अस्पताल इत्यत्र चिकित्सा प्रचलति। सा चिकित्सालयात् आनीता। अन्नत्यागस्य समये सोमवासरे तस्याः शर्करा स्तरः अपचितः। अतः सा चिकित्सालये पंजीकारिता आसीत्।

# HPCM: प्रारम्भिक-बाल्यकाल-परिचर्या, शिक्षा-अनुशिक्षक- योजना कार्यान्विता भविष्यति




**हिमसंस्कृतवार्ताः - शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः ३-६ वर्षाणाम् आयुवर्गस्य बालकानां कृते हिमाचलप्रदेशस्य प्रारम्भिकबाल्यकालस्य शिक्षायाः अनुशिक्षकयोजनायाः आरम्भं कर्तुं गच्छति, येन बालकानां सर्वतोमुखी विकासः सम्भवति। सः अवदत् यत् सम्प्रति राज्यस्य प्राथमिकविद्यालयानां परिसरेषु ६,२९७ पूर्वप्राथमिकविभागाः चालिताः सन्ति, यत्र प्रायः ६० सहस्राणि छात्राः अध्ययनं कुर्वन्ति। एतदतिरिक्तं एतैः प्राथमिकविद्यालयैः सह २३७७ आङ्गनबाडीकेन्द्राणि अपि सञ्चालितानि सन्ति। गुरुवासरे प्रसारिते वक्तव्ये मुख्यमन्त्री उक्तवान् यत् राष्ट्रियशिक्षानीति-२०२० इत्यस्य अन्तर्गतं राज्यानां शिक्षाविभागेभ्यः व्यापकं प्रारम्भिकपरिचर्या- शिक्षाकार्यक्रमाः सज्जीकर्तुं परामर्शः दत्तः। शिक्षाविभागः प्रारम्भिक-बाल्यपरिचर्या- शिक्षाकार्यक्रमस्य चत्वारि अपि प्रारूपाणि कार्यान्वयिष्यति। सः अवदत् यत् एतेषु चतुर्षु प्रारूपेषु आंगनबाडीकेन्द्राणि, प्राथमिकविद्यालयेषु चालितानि आंगनबाडीकेन्द्राणि, पूर्वस्थापितेषु पूर्वप्राथमिकविद्यालयेषु अध्ययनं कुर्वन्तः ५-६ वर्षाणां बालकाः, पूर्वप्राथमिकविद्यालयेषु च समाविष्टाः भविष्यन्ति।
मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः राष्ट्रिय तकनीकीशिक्षापरिषदः नियमानुसारं ६,२९७ विद्यालयानां कृते अध्यापकानां नियुक्तिं करिष्यति। सर्वकारस्य एषः उपक्रमः बालकानां कृते गुणवत्तापूर्णशिक्षाप्रदानस्य प्रतिबद्धतां, तेषां सर्वाङ्गीणविकासं च प्रदर्शयति। सुक्खुः उक्तवान् यत् राज्यसर्वकारस्य मूलोद्देश्यं छात्राणां गृहसमीपे गुणवत्तापूर्णशिक्षाप्रदानं, शिक्षाक्षेत्रे नवीनतां समावेशयितुं च अस्ति। राज्यसर्वकारः शिक्षकाणां विविधपदानि पूरयितुं गच्छति, तदर्थं प्रक्रिया आरब्धा अस्ति। राज्यसर्वकारः प्रत्येकस्मिन् विधानसभाक्षेत्रे एकं राजीवगान्धी-दिवस- बोर्डिंग- विद्यालयम् उद्घाटयितुं गच्छति।

# Mandi Film Festival: लघ्वीकाश्यां मण्ड्यां चलचित्रमहोत्सवः आरब्धः




**हिमसंस्कृतवार्ताः - लघ्वीकाशी मण्डी।**
लघ्वीकाशी-नाम्ना प्रसिद्धस्य मण्डीनगरस्य चतुर्दिवसीयः संस्कृतिसदने औपचारिकरूपेण हिमाचल- अन्तर्राष्ट्रीय- चलत्र- महोत्सवः आरब्धः। अस्य चलचित्रमहोत्सवस्य आयोजनं कला इन्टरटेन्मेण्ट इत्यनेन रतनसिंह सर्राफ एण्ड संज इत्यस्य सहयोगेन मिलित्वा क्रियते। मण्डीनगरे प्रथमवारं चलचित्रमहोत्सवस्य आयोजनं क्रियते। चलचित्रमहोत्सवस्य उद्घाटनं अतिरिक्त- उपायुक्तः मण्डी रोहित राठौरेण कृतम्, अभिनेता अखिलेन्द्रमिश्रः, निर्देशकः आदित्यहोमः च विशेषतया उपस्थिताः आसन्। चलचित्रमहोत्सवस्य प्रथमदिने मण्डीमण्डलस्य चतुर्णां व्यक्तित्वानां लाइफटाइम अचीवमेण्ट पुरस्कारेण सम्माननं कृतम्। तेषु लेखनसाहित्यक्षेत्रे सुन्दरलोहिया तथा कृष्णकुमार नूतनः, संगीतक्षेत्रे सोमदेवकश्यपः प्रसिद्धः नाट्यकलाकारः प्रो. रमेश रवि इत्यस्य नाम अन्तर्भूतम् अस्ति। तेभ्यः सर्वेभ्यः उत्तरीयम्, शिरस्त्राणं, स्मृतिचिह्नानि, राशिः च प्रदत्ता। चलचित्रमहोत्सवे विशेषतया आगतः अभिनेता अखिलेन्द्रमिश्रः लघ्वीकाश्यां एतादृशं प्रयासं कृत्वा आयोजकानाम् अभिनन्दनं कृतवान्। सः अवदत् यत् कलाइन्टरटेन्मेण्ट तथा रतनसिंह सर्राफ एण्ड संज इत्येतयोः कृते अन्यैः सह राजासिंहमल्होत्रा, प्रसिद्धनिर्देशकः पवनशर्मा च कृताः प्रयत्नाः यदि प्रत्येकस्मिन् नगरे एतादृशाः प्रयासाः आरभ्यन्ते तर्हि

कलाप्रेमिणाम् अग्रे गन्तुं साहाय्यं भविष्यति। अवसरं प्राप्स्यति। अद्भुतं आयोजनं कृत्वा आयोजकानाम् अभिनन्दनं कृतवान्। हिमाचल- अन्तर्राष्ट्रीय- चलचित्रमहोत्सवे मुख्यातिथिरूपेण आगतः एडीसी मण्डी रोहितराठौरः अस्य आयोजनस्य आयोजकानाम् अभिनन्दनं कृतवान्। सः अवदत् यत् प्रथमवारम् एतादृशम् आयोजनं कृत्वा जनाः एतादृशानि बहूनि चलचित्राणि द्रष्टुं प्राप्नुयुः येषां दर्शनस्य अवसरः दुर्लभाः एव प्राप्नुवन्ति। तस्मिन् एव काले स्थानीयनाट्यकलाकाराः अपि अस्मात् बहु किमपि ज्ञातुम् अवसरं प्राप्नुयुः। एतत् हिमाचलप्रदेशस्य विशेषतया च मण्डी- नगरस्य कृते गौरवस्य विषयः अस्ति। आयोजकः राजासिंहमल्होत्रा स्वसम्बोधने उक्तवान् यत् कला इन्टरटेन्मेण्ट इत्यस्य आरम्भस्य उद्देश्यं कलाक्षेत्रे कार्यं कुर्वतां जनानां कृते स्वप्रतिभां प्रदर्शयितुं मञ्चं प्रदातुं वर्तते। एतेन सह अयं चलचित्रमहोत्सवः अस्य उद्देश्यस्य आयोजनं क्रियते यत् जनाः ज्ञातुं शक्नुवन्ति यत् चलचित्रस्य निर्माणे कियत् परिश्रमः भवति, तस्य निर्माणं कथं भवति इति। सः अवदत् यत् भविष्ये अपि कला इन्टरटेन्मेण्ट इत्यस्य पक्षतः एते प्रयासाः निरन्तरं भविष्यन्ति। चलचित्रमहोत्सवे अभिनेता अखिलेन्द्रमिश्रः, निर्देशकः आदित्यहोमः, कलाकारः सपना सण्ड, गगनप्रदीपशर्मा, पिहुः च सम्मानिताः। अस्मिन् चतुर्दिवसीयचलचित्रमहोत्सवे ४० चलचित्राणि निःशुल्कं प्रदर्श्यन्ते।

# Bhisham Project : हिमाचले यत्र महती आपदा; तत्र चिकित्सालयः प्राप्स्यति, अष्टनिमेषेषु भविष्यति चिकित्सा




**हिमसंस्कृतवार्ताः - बिलासपुरम्।**
हिमाचले मेघविस्फोटस्य, जलप्रलयस्य वा अन्यस्य प्राकृतिकविपदायाः कारणेन मार्गाः निरुद्धाः भवन्ति चेत् पीडितानां चिकित्सायाः वञ्चनं न भविष्यति। आपदापीडितानां कृते स्थले एव समये चिकित्सा भविष्यति। पीडितानां चिकित्सायै चिकित्सालयं गन्तुं न प्रयोजनं भविष्यति, अपि तु चिकित्सालयः एव तेषां समीपम् आगमिष्यति। एतत् केन्द्रसर्वकारस्य परियोजना भीष्मद्वारा सम्भवं भविष्यति। कस्यापि प्रकारस्य आपदि जनानां कृते समुचितसमये स्थले एव चिकित्सां कर्तुं केन्द्रसर्वकारेण अस्याः परियोजनायाः अन्तर्गतं राज्यस्य बिलासपुरस्य अखिलभारतीय- आयुर्विज्ञासंस्थानम् (एम्स) समाविष्टम् अस्ति। बिलासपुरस्य एम्स-इति देशस्य प्रथमं स्वास्थ्यसंस्थानम् अस्ति यद् परियोजनया सह सम्बद्धः इति विश्वासः क्रियते।
परियोजनायाः अन्तर्गतम् अखिलभारतीय- आयुर्विज्ञासंस्थानम् उत्तमस्वास्थ्यसेवाप्रदानार्थं आरोग्यमैत्री इत्यस्य सुविधां ग्रहीष्यति। अखिलभारतीय- आयुर्विज्ञासंस्थानस्य चिकित्साधीक्षकः डॉ. दिनेशवर्मा बिलासपुरस्य बचतभवने उपायुक्तस्य अध्यक्षतायां आयोजितायां आपदा-प्रबंधनसभायां एतद् प्रकटितवान्। डॉ. दिनेशः अवदत् यत् एम्सः परियोजनायां सम्मिलितः अभवत्, अधुना राज्ये कुत्रापि आपदा सति केवलं अष्टनिमेषेषु तत्र चिकित्सालयः सज्जीकृत्य रोगिणां चिकित्सा आरब्धुं शक्यते। एतत् लाभप्रदं भविष्यति यत् कोऽपि आपदापीडितः चिकित्सायाः अभावात् न म्रियते। अखिलभारतीय- आयुर्विज्ञासंस्थानस्य चिकित्सकेभ्यः प्रशिक्षणं दत्तम् अस्ति। पेटीकासु स्थापितानि चिकित्सालयस्य वस्तूनि मासत्रयानन्तरं बिलासपुरं प्राप्स्यन्ति।

## एवं निर्मितः भविष्यति चिकित्सालयः, युगपत् २०० जनानां चिकित्सा भविष्यति

परियोजना-भीष्मस्य अन्तर्गतम् एम्सबिलासपुराय ७२० किलोभारस्य ३६ पेटिकाः प्राप्ताः भविष्यन्ति। तस्मिन् सर्वाणि चिकित्सालयस्य वस्तूनि उपस्थितानि भविष्यन्ति। एताः पेटिकाः चक्रविमानस्य साहाय्येन आपदास्थलं प्रति प्रस्थापयिष्यन्ते। एतासां पेटिकानां विशेषता अस्ति यत् एताः महता ऊर्ध्वतः पातिताः चेत् न भग्नाः भवन्ति न च जलेन प्रभाविताः भवन्ति। ३६ पेटीकाः स्थानं प्राप्तवति ततः परं ८ निमेषेषु चिकित्सालयं सज्जीकृत्य रोगिणां चिकित्सा आरब्धुं शक्यते। अत्र २०० जनानां चिकित्सासुविधाः भविष्यन्ति। तस्मिन् एव काले अस्मिन् शल्यक्रियागृहात् आरभ्य एक्स- रे- वेण्टिलेटर-पर्यन्तं सुविधाः अपि भविष्यन्ति। रक्तस्य प्रतिरूपाणि अपि ग्रहीतुं शक्यन्ते। "परियोजनं प्राप्य बिलासपुरसहितं राज्यस्य अन्येभ्यः जनपदेभ्यः अपि प्रत्यक्षलाभः भविष्यति। एम्स इत्यनेन आपदः निवारणाय पृथक् एस. ओ. पी. सज्जीकृता, एतत् प्रशंसनीयं सोपानम् अस्ति। अखिलभारतीय- आयुर्विज्ञानसंस्थानस्य नियन्त्रणकक्षं प्रत्यक्षतया जिला आपदाप्रबन्धनस्य नियन्त्रणकक्षेण सह सम्बद्धं भविष्यति येन कस्यापि प्रकारस्य आपदि सूचनाः सञ्ज्ञकर्तुं शक्यन्ते।

**-आबिदहुसैन सादिकः**
**उपायुक्तः, बिलासपुरम्**

# सेन्सेक्सः ७९००० पारं कृत्वा नूतने उच्चस्तरे, निफ्टी अपि नूतनशिखरं प्रति

**हिमसंस्कृतवार्ताः - दिलीपः, नादौनम्।** सप्ताहस्य चतुर्थे व्यापारदिने आन्तरिकशेयरविपणिः नूतनानि ऊर्ध्वतानि प्राप्तुं प्रक्रिया निरन्तरम् अप्रचलत्। प्रारम्भिक आरोहावरोहानन्तरं गुरुवासरे प्रमुखाः बेन्चमार्क-सूचकाङ्काः सेन्सेक्स-निफ्टी- इत्येतयोः पुनः लयागतवन्तौ। ततः सार्वकालिकस्य नूतन-उच्चतम-स्तरं प्राप्तवन्तौ। रिलायन्स आईटी च इत्येतयोः बलस्य कारणेन विपणः इत्यस्य बलं प्राप्तम्। गुरुवासरे सेन्सेक्सः अन्ततः प्रथमवारं ५६८.९३ (०.७२%) अंकलाभेन ७९,२४३.१८ इति स्तरं प्राप्तवान्। अपरपक्षे निफ्टी अपि १७५.७१ (०.७४%) अंकलाभेन २४,०४४.५० इति क्रमेण समाप्तः।

**सुवर्णः १२० रुप्यकैः पतितः, रजतस्तु ९०,६०० रुप्यकेषु एव स्थिरः।**
गुरुवासरे राष्ट्रियराजधान्याः बुलियनविपण्यां सुवर्णस्य मूल्यं १२० रुप्यकाणि न्यूनं भूत्वा प्रतिदशग्रामं ७२,१८० रुप्यकाणि अभवत्। परन्तु विगतदिवसस्य समापनमूल्ये प्रतिकिलो ९०,६०० रुप्यकाणि रजतस्य मूल्यम् अपरिवर्तितम् एव अभवत्।

# कृषिविश्वविद्यालये, पालमपुरे, शिमलाविश्वविद्यालये च कुलपतेः नियुक्त्यर्थं राजभवनस्य दोषः नास्ति



**हिमसंस्कृतवार्ताः - शिमला।** कृषिविश्वविद्यालये, पालमपुरे, शिमलाविश्वविद्यालये च कुलपतेः नियुक्त्यर्थं राजभवनस्य दोषः नास्ति इति राज्यपालः शिवप्रतापशुक्लः उक्तवान्। गुरुवासरे राजभवनशिमलायां पत्रकारसम्मेलनं सम्बोधयन् राज्यपालः अवदत् यत् अहं नियमविरुद्धं किमपि न करिष्यामि। यावत् अहं तत्र अस्मि तावत् राज्यपालपदस्य गौरवं निर्वाहयिष्यामि। कृषिविश्वविद्यालयस्य कुलपतिप्रकरणे राजभवने मन्त्री चन्द्रकुमारेण दत्तस्य वक्तव्यस्य विषये राज्यपालः शिवप्रतापशुक्लः पत्रकारसम्मेलने स्वस्थानं स्पष्टीकृतवान्। सः अवदत् यत् कृषिविश्वविद्यालय- संशोधनविधेयकं २०२३ अद्यापि सर्वकारेण सह अस्ति। सर्वकारात् पुनः आगत्य राष्ट्रपतिं प्रति अनुमोदनार्थं प्रेषितं भविष्यति। सः अवदत् यत् कृषिविश्वविद्यालये कुलपतिनियुक्तेः विषयः अपि उच्चन्यायालये विचार्यः अस्ति। राजभवनेन स्थगितस्य ह्रासार्थं याचिका प्रविष्टा अस्ति। पुरातननियमानुसारं कुलपतिचयनार्थं समितिः निर्मिता अस्ति, यदि शीघ्रमेव न्यायालयस्य स्थगनं हृतं भवति तर्हि कुलपतिः अपि तत्क्षणमेव नियुक्तः भविष्यति। राज्यपालः अवदत् यत् सर्वकारेण सर्वकारस्य सहमतिः आधारेण कृषिविश्वविद्यालये कुलपतेः नियुक्तिः करणीयः इति प्रस्तावः प्रेषितः।

# हिमाचलं प्राप्तः मानसूनः, राज्ये पञ्चदिनानि यावत् क्रमशः प्रचण्डवृष्टेः सचेतना



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे दक्षिणपश्चिममानसूनः आगतः अस्ति। ऋतुविज्ञानकेन्द्रशिमला इत्यस्य अनुसारं गुरुवासरे राज्यस्य अनेकेषु भागेषु मानसूनः प्राप्तः अस्ति। शेषभागाः २-३ दिवसेषु प्रवेशं कर्तुं शक्नुवन्ति। ऋतुविज्ञानकेन्द्रशिमलायाः निदेशकः सुरेन्द्र पॉल इत्यनेन एतस्य पुष्टिः कृता। अपरपक्षे गतदिवसात् पञ्चदिनानि यावत् राज्ये प्रचण्डवृष्टेः सचेतना निर्गता अस्ति। राज्ये जुलाईमासस्य ०३ दिनाङ्कपर्यन्तं निरन्तरं वर्षा भविष्यति। जूनमासस्य २८ दिनाङ्कात् वर्षा गतिं वर्धयिष्यति। गतवर्षे २०२३ तमस्य वर्षस्य जूनमासस्य २४ दिनाङ्के मानसूनः राज्यं प्राप्तवान्। हिमाचलप्रदेशस्य शिमलानगरे मानसूनस्य आगमनस्य सामान्यतिथिः २२ जूनं भवति। राज्ये मानसूनस्य प्रारम्भिकम् आगमनं २००० तमे वर्षे जूनमासस्य ९ दिनाङ्के अभवत्, तस्य आगमनं च सर्वाधिकं विलम्बितं २०१० तमस्य वर्षस्य जुलैमासस्य ५ दिनाङ्के अभवत्।

अस्मिन् काले केषुचित् स्थानेषु वज्रपातस्य पीतसचेतना भवति। विभागेन प्रसारितस्य नवीनतमस्य पूर्वानुमानस्य अनुसारं जूनमासस्य २७ दिनाङ्कपर्यन्तं जुलाईमासस्य १ दिनाङ्कपर्यन्तं प्रचण्डवृष्टेः पीतसचेतना अस्ति। अद्यत्वे अपि शिमलानगरे वातावरणं प्रतिकूलम् अस्ति। अत्र प्रातःकाले सामान्या वृष्टिः आसीत्। उपरि शिमलायाः अनेकेषु भागेषु अपि वर्षा अभवत्। काङ्गड़ा- लाहौल- स्पीति- मण्डलेषु अनेकेषु भागेषु अपि वर्षा अभवत् ।

## एतेषां मण्डलानां कृते सचेतना जनेभ्यः नद्यः, नालिकाभ्यः च दूरं स्थातुं परामर्शः

ऋतुविभागस्य अनुसारं २८ तः ३० जूनपर्यन्तं बिलासपुरं, हमीरपुरं, चम्बा, काङ्गड़ा, मण्डी, शिमला, सोलनं, सिरमौरम् इत्यत्र अत्यधिकवृष्टेः सम्भावना वर्तते। अस्य तीव्रता जूनमासस्य २९, ३० दिनाङ्केषु अधिकतमं भविष्यति। अस्मिन् काले राज्यस्य निम्नमध्यपर्वतीयजनपदेषु एकान्तस्थानेषु वज्रपातेन सह प्रतिहोरां ४० तः ५० किलोमीटर वेगेन प्रचण्डवायुः भवितुं शक्यते अस्मिन् काले औसतं न्यूनतमं अधिकतमं च तापमानं सामान्यतः न्यूनं भवितुं शक्यते।

# जे पी देशस्य नवनिर्माणस्य महान योद्धा अस्ति, यस्य संघर्षस्य कारणतः देशे लोकतंत्रं जीवति





**हिमसंस्कृतवार्ताः नवदेहली, राघवनाथझा।** जे पी आंदोलनस्य ५० वर्षाणि पूर्णानि सन्ति इत्यस्योपक्ष्ये नवदेहल्यां स्थिते इंडिया-इंटरनेशनल-केन्द्रमध्ये सम्पूर्णक्रांति आंदोलनमहोत्सवः आयोजितः। समारोहस्य उद्घाटनं हिमाचलप्रदेशस्य माननीयः राज्यपालः श्री शिवप्रतापः शुक्लः कृतवान्। स्वस्यउद्घाटनभाषणे श्रीशुक्लः उक्तवान् यत् जे पीं देशस्य नवनिर्माणस्य महान योद्धा अस्ति, यस्य संघर्षस्य कारणतः देशे लोकतंत्रं जीवति। वयं मुक्तवायुना श्वासं कुर्मः। एतत् सर्वंसप्ततिदशकस्य नवनिर्माणां दोलने तस्य भूमिकां विना सम्भवः नास्ति। देशस्य स्वातन्त्र्यं , तदनन्तरं च तस्य स्थायित्वनिमित्तं तस्य संघर्षः देशस्य इतिहासे स्वर्णाक्षरैः लिखितः भविष्यति। लोकनायकः जयप्रकाशः अंतरराष्ट्रीय-अध्ययन-विकास-केन्द्रेण आयोज्यमानाः कार्यक्रमाः प्रशंसनीयाः सन्ति, यत् तेन तस्य स्मृतिं संजोयितुं प्रयासः अस्ति। अस्मिन कार्ये संस्थायाः महासचिवः श्री अभयसिन्हाय अभिनन्दनं मया दीयते। समारोहे सम्पूर्णक्रान्त्याभियानस्य महत्त्वपूर्णभूमिकां निर्वहन्तः प्रमुखांदोलनकर्मिणः श्री रघुपतिः, श्री कुमारअनुपमः, पूर्वमंत्री बिहारः श्रीश्यामः रजकः, प्रसिद्धः समाजवादी श्री श्यामगंभीरः, वरिष्ठः गांधीवादी महात्मागांधी स्मारकट्रस्ट-बाराबंकी अध्यक्षः श्री राजनाथः शर्मा च वरिष्ठः पत्रकारः लेखकः पर्यावरणविदः राष्ट्रीय पर्यावरण-सुरक्षा-समितेः अध्यक्षः श्री ज्ञानेन्द्रः रावतः उपस्थिता आसन्। सम्मानसमारोहे माननीयः राज्यपालः श्री शिवप्रतापशुक्लः किञ्च केन्द्रीयतिब्बती प्रशासनस्य पूर्वप्रधानमंत्री प्रोफेसरः समदोंगः रिनपोछे, प्रख्यातः विचारकः श्री रघुठाकुरः, प्रख्यातः गायकः भजनसम्राटः पद्मश्री अनूपजलोटः, पद्मश्री विमलकुमारः जैनः, प्रख्यातः पत्रकारः श्री के विक्रमः रावः एवम् श्री राहुलः देवः, अखिलभारतीयसंतसमाजस्य अध्यक्षः स्वामी चक्रपाणिः महाराजः, पूर्व सांसदः राजा मानवेन्द्रः सिंहः, पूर्व डीजीपी श्री आमोदः कंठः, कुलपतिः सिद्धू कान्हू विश्वविद्यालयः दुमका इत्यस्य प्रो० बिमलः प्रसादः सिंहः, मेजर जनरलः श्री अनुजः माथुरः, रेजिडेंट कमिश्नरः जे एण्ड के आई ए एस श्री रश्मिः सिंहः, निदेशकः सेंट्रल काटेज इंडस्ट्री-कारपोरेशन श्रीमनोजलालः नरकटियागंज, बिहारस्य विधायकः श्री रश्मिः वर्मा सहितं देशस्य प्रबुद्धाः विद्वान्सः, विचारकाः, समाजवादिनः चिंतकाः, समाजसेविनः गरिमामयीं उपस्थितिं पञ्जीकृतवन्तः। मंचस्य संचालनं अंतर्राष्ट्री व्यापारः स्टार्टअप उद्यमी संघस्य अध्यक्षः अंशुमानसिंहः कृतवान्।

# विंशतिः- विंशतिः विश्वचषकस्य द्वितीये उपान्त्यचक्रे भारतेन इंग्लैण्डदेशः 68 धावनांकैः पराजितः

## अन्तिमा क्रीड़ा श्वः भारत- दक्षिण अफ्रीकादेशयोः मध्ये भविष्यति





## अक्षर पटेलः प्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः

**हिमसंस्कृतवार्ताः - कामेश्वर शर्मा** विश्वचषकस्य द्वितीये उपान्त्यचक्रे भारतदेशेन इंग्लैण्डदलं 68 धावनांकैः पराजितम्। टॉसमिति विजित्य इंग्लैण्डदेशेन क्षेत्ररक्षणं चयनितम्। भारतस्य प्रारम्भः सुदृढ़ः नाभवत्। विराट कोहली 9 तथा ऋषभ पन्त 4 धावनांकानामोपरि क्रमशः टॉप्ली तथा सैम करणेन बाधितौ। परञ्च तदन्तरं रोहित शर्मा इत्यस्य 39 कन्दुकेषु 2 षट्कयोः, 6 चतुष्काणां च साहाय्येन 57, सूर्यकुमारयादवश्च 47 धावनांकानां साहाय्येन भारतं 20 कन्दुचक्रेषु 171 धावनांकपर्यन्तम् नीतवन्तः। इंग्लैण्डपक्षतः क्रिस जॉर्डन 3, आदिल राशिदः, सैम करणः, जोफ़ा आर्चरः, टॉप्ली च 1-1 स्तोभं गृहीतवन्तः। 173 धावनांकानां लक्ष्यप्राप्तिक्रमे इंग्लैण्डदेशस्य प्रारम्भः अपि सुदृढ़ः नाभवत्। कुलदीप यादवः तथा अक्षर पटेलः इत्यनयोः घातककन्दुक्षेपणेन इंगलैण्डदेशः 16.4 कन्दुचक्रेषु दश स्तोभहानौ 103 धावनांकानेव अर्जितवान्। भारतपक्षतः अक्षर पटेलः, कुलदीप यादवः 3-3, जसप्रीत बुमराहश्च 2 स्तोभान् ग्रहीतवन्त। अधुना अन्तिमचक्रे भारत-दक्षिण अफ्रीका देशयोः मध्ये प्रतिस्पर्धा श्वः भविष्यति।

# अखिलभारतीयदर्शनपरिषद्द्वारतद्वारा हेमवतीनन्दन- गढ़वाल-विश्वविद्यालयस्य सहायकप्राध्यापिका डॉ. कविताभट्टशैलपुत्री सम्मानिता



**परिषदः ६८ तमे वार्षिकसत्रे कश्मीरविश्वविद्यालयस्य भव्य सभाशालायां शैलपुत्री प्रो.**

## सोहनराजतांतेड- दर्शनपुरस्कारेण सम्मानिता जाता

हिमसंस्कृतवार्ता:- कुलदीपमैन्दोला। अखिलभारतीयदर्शनपरिषदः, भारतस्य ६८तमं वार्षिकसत्रं कश्मीरविश्वविद्यालयस्य श्रीनगरस्य कश्मीरस्य भव्यसभाशालायां सम्पन्नम् अभवत्। अस्मिन् सम्मेलने सम्पूर्णे भारते विभिन्नराज्येभ्यः दर्शनशास्त्रस्य जगतः प्रायः चतुःशताः शिक्षाविदः, शिक्षकाः, विद्वांसः च भागं गृहीतवन्तः। अस्य अधिवेशनस्य उद्घाटनसत्रे परिषद् दर्शनशास्त्रादिक्षेत्रे विलक्षणकार्यं कृतवद्भ्यः शिक्षाविद्भ्यः प्रतिष्ठितपुरस्कारान् सम्मानान् च दत्तवती। 2023 वर्षस्य प्रख्यातः प्रो. सोहनराजतांतेडदर्शनपुरस्कारः हेमवतीनन्दन- गढ़वाल- विश्वविद्यालयस्य दर्शनशास्त्रविभागस्य सहायकप्राध्यापिकायै प्रख्यातसाहित्यविदुष्यै डॉ. कविताभट्टशैलपुत्र्यै प्रदत्तोऽभवत्। ज्ञातव्यं यत् योग-दर्शन-साहित्य-क्षेत्रे 'शैलपुत्री' इति नाम्ना प्रसिद्धस्य डॉ. भट्टस्य 'घेरण्डसंहितायां षटकर्म, योगाभ्यासः, योगः च' इति ग्रन्थस्य कृते एषः पुरस्कारः दत्तः। प्रायः त्रिशतपञ्चाशत् पृष्ठीयमिदं ग्रन्थं भारतस्य प्राचीनतमप्रकाशकेषु अन्यतमस्य दिल्लीनगरस्य-चौखम्भासंस्कृत-प्रतिष्ठानात् प्रकाशितम् अस्ति। एषः पुरस्कारः प्रो. कश्मीरविश्वविद्यालयस्य कुलपतिः नीलोफरखानः, अखिलभारतीयदर्शनपरिषदः अध्यक्षः प्रो. जटाशंकरः, अखिलभारतीयदर्शनपरिषदः सचिवः प्रो. ज्योतिस्वरूपदुबे, विभागाध्यक्षः प्रो. मेराज अहमदः, संस्कृतविभागस्य प्रो. मठवाले इत्यादिभिः दर्शनशास्त्रिभिः शिक्षाविद्भिश्च अयं पुरस्कारः प्रदत्तः। अस्मिन् अवसरे दर्शन-शिक्षा-जगतः प्रख्यातव्यक्तयः, शोधकर्त्तारः, विद्वांसः च उपस्थिताः आसन्। उल्लेखनीयं यत् 'शैलपुत्री' इति लोकप्रियतया प्रसिद्धा डॉ. कविता भट्टः विगतेभ्यः २५ वर्षेभ्यः भारतीयदर्शनं, योगदर्शनं, गीतादर्शनं, महिलासशक्तिकरणं, हिन्दीसाहित्यं च केन्द्रीकृत्य लेखनस्य दर्शनस्य च गूढविषयाणां लोकप्रियीकरणाय समर्पिता अस्ति या गम्भीरा लेखिका, तेजस्वी व्याख्याता, शिक्षाविदषी च अस्ति। डॉ. भट्टवर्यायाः २७ पुस्तकानि, अनेकेशोधपत्राणि, लोकप्रियलेखाः, विभिन्नविधासु केन्द्रितानि शतशः साहित्यकृतयः काव्यानि च प्रकाशितानि सन्ति। डॉ. भट्टस्य कृतयः देशे विदेशेषु च अनेकभाषासु अनुवादिताः सन्ति। ज्ञातव्यं यत् डॉ. कविताभट्टद्वारा पूर्वमेव साहित्य- अकादमी मध्यप्रदेशस्य, अखिलभारतीय-साहित्य- अकादमीपुरस्कारः, कनाडादेशस्य हिन्दी चेतना सृजनसम्मानः च इत्यादयः अनेके अन्तर्राष्ट्रीयाः राष्ट्रियपुरस्काराः/ सम्मानानि च प्राप्तानि सन्ति। डॉ. भट्टशैलपुत्री भारतीयोच्चायोगे, अनेकमन्त्रालयेषु, साहित्यिक- अकादमिषु, शैक्षणिकसंस्थासु इत्यादिभिः सहितैः अनेकैः विदेशीयमञ्चैः व्याख्यानार्थं निरन्तरम् आमन्त्रिताऽभवत्। डॉ. कविताभट्टवर्यया अखिलभारतीयदर्शनपरिषदः सर्वेषां अधिकारिणां निर्णायकमण्डलस्य च अस्य पुरस्कारस्य धन्यवादः कृतः। विश्वविद्यालयपरिवारस्य तेषां प्रशंसकानां च कृते अयं पुरस्कारः आनन्दं जनयति। कश्मीरतः प्रत्यागत्य सा अवदत् यत् २०२४ तमस्य वर्षस्य जूनमासस्य १० तः १२ दिनाङ्कपर्यन्तं परिषद्द्वारा आयोजिते अस्मिन् सत्रे कश्मीरविश्वविद्यालयस्य कुलपतिः प्रो. नीलूफर खानः अपि विश्वविद्यालये दर्शनशास्त्रविभागस्य उद्घाटनस्य घोषणां कृतवती, कथितम् यत् अस्मिन् विभागे अध्ययनम् अस्मात् सत्रात् आरभ्यते इति। तार्किकशक्तिविकासाय, स्पर्धात्मकपरीक्षाणां, नैतिक- उत्थानस्य च कृते छात्राणां दर्शनशास्त्रस्य अध्ययनं करणीयम् इति अपि सा अवदत्। विश्वविद्यालये दर्शनविभागस्य उद्घाटनार्थं अखिलभारतीयदर्शनपरिषदः अधिकारिणां विशेषानुरोधः प्रयत्नाश्च फलं प्राप्तवन्तः इति परिषदः प्रसन्नतां प्रकटितवती।

## हिमसंस्कृतगीतमञ्जरी

हिमसंस्कृतवार्ताः

### त्वात्के आयानेन हे, त्वात्के आयानेन हे

(Sanskrit Version lyrics of Hindi film song

***मय से मीना से साकी से***

M - मद्यैः रामातो ना पानेन
मद्यैः रामातो ना पानेन ना आयत्ते हे,
हृदयसुखता मे प्रिये,त्वात्के आयानेन हे
त्वात्के आयानेन हे,त्वात्के आयानेन हे,
त्वात्के आयानेन हे,त्वात्के आयानेन हे
F - पुष्पैः कलिभिः ना पक्षिणां,
पुष्पैः कलिभिः ना पक्षिणां,स्वानन्दे हे
हृदयसुखता मे प्रिये, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे -------- (०१)
M - स्वाप्ने स्वर्जातचित्रम्,आगतं यत्सम्मुखे
F - रु रु रु रु रु रु रु रु रु रु रु रु रु रु रु
रु रु रु रु रु रु रु रु
M - स्वाप्ने स्वर्जातचित्रम्,आगतं यत्सम्मुखे
पुष्पैः नाऽपि हृदः सुखं अन्विष्येऽहं त्वां प्रिये
स्वर्गीयासुखेषु ना कामिनीनां
स्वर्गीयासुखेषु ना कामिनीनां सुस्मितेषु हे
हृदयसुखता मे प्रिये, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे --------- (०२)
F - एकदा अहं गताऽऽसं भूषणाक्रयक्रमे
रु रु रु रु रु रु रु रु रु रु रु रु रु रु रु
रु रु रु रु रु रु रु रु
एकदा अहं गताऽऽसं भूषणाक्रयक्रमे
ते हि दृक्स्मरणे मे,हीरकासुहारे हे
मौक्तिके हीरके न भूषायां
मौक्तिके हीरके न भूषायां,ना सम्पत्सु मे
हृदयसुखता मे प्रिये, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे
त्वात्के आयानेन हे, त्वात्के आयानेन हे
M - मद्यैः रामातो ना पानेन
मद्यैः रामातो ना पानेन ना आयत्ते हे,
हृदयसुखता मे प्रिये,त्वात्के आयानेन हे
त्वात्के आयानेन हे,त्वात्के आयानेन हे
F - त्वात्के आयानेन हे,त्वात्के आयानेन हे ------- (०३)

**रचयिता - डा.रुरुकुमारमहापात्रः(अध्यापकः)**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

# शिक्षासंस्कृति-उत्थानन्यासस्य देवसंस्कृतिविश्वविद्यालयस्य च ज्ञानकुम्भः कुम्भनगरे हरिद्वारे भविष्यति






हिमसंस्कृतवार्ताः-कुलदीपमैन्दोला।हरिद्वारम् 28 जून शिक्षासंस्कृति-उत्थान्न्यासस्य तथा देवसंस्कृतिविश्वविद्यालयस्य हरिद्वारस्य संयुक्ताश्रयेण सितम्बरमासस्य तृतीयसप्ताहे ज्ञानकुम्भस्य आयोजनं भविष्यति। ज्ञानकुम्भस्य आयोजनार्थं न्यासस्य कार्यकर्तृभिः विश्वविद्यालयस्य अधिकारिभिः सह एका सभा आयोजिता । यत्र शिक्षासंस्कृति-उत्थानन्यासस्य राष्ट्रियसचिवः डॉ. अतुलभ्रातः कोठारी, देवसंस्कृतिविश्वविद्यालयस्य प्रो. कुलपतिः डॉ. चिन्मय पाण्ड्या च उपस्थितौ अभवताम् । सभायां निर्णयः अभवत् यत् सितम्बरमासस्य तृतीयसप्ताहे देशस्य विद्वांसः अपि च विश्वविद्यालयेषु शैक्षणिकक्षेत्रेषु च कार्यं कुर्वन्तः जनाः एकस्मिन् मञ्चे एकत्र आनयन् राष्ट्रियशिक्षानीतेः कार्यान्वयनार्थं ज्ञानकुम्भस्य आयोजनं भविष्यति विद्यालयशिक्षा उच्चशिक्षा चात्र निर्णये भविष्यति।

सभां सम्बोधयन् न्यासस्य राष्ट्रियसचिवः डॉ. अतुलभ्रातः कोठारी इत्यनेन उक्तं यत् यदि समाजं राष्ट्रं च परिवर्तयितव्यं तर्हि शिक्षायां भारतीयीकरणं मूल्यशिक्षां च प्रदातुं प्रवृत्ता भविष्यति । वर्तमाने युवाचरित्रनिर्माणे कार्यकरणस्य आवश्यकता वर्तते। तैः प्रोक्तं यत् भारतीयज्ञानरम्परायां शिक्षायां संस्काराणां च चरित्रनिर्माणस्य चिन्तनम् आसीत् परञ्च आधुनिकसमये चरित्रस्य संस्कारस्य च नैतिकमूल्यानाम् अभावः सर्वत्र दृश्यते । संस्कारितं जीवनं जीवन्तः शिक्षकाः अभिभावकाः छात्राः अद्यत्वे दुर्लभाः दृश्यन्ते। समाजसमक्षे सचैतन्यविषयोयं वर्तते।

**अस्मिन् अवसरे न्यासकार्यकर्तृभिः देवसंस्कृतिविश्वविद्यालयेन स्वाश्रयमाश्रितानि परियोजनानि दृष्टानि। अस्मिन् अवसरे न्यासस्य क्षेत्रीयसङ्गठनमन्त्री जाग्रामः, रजिस्ट्रार देवसंस्कृतिविश्वविद्यालयः, न्यासस्य प्रदेशसंयोजकः डा. मुकेशः, डॉ. आनंद, डॉ. हिमांशुपण्डितः, मनोजजखमोला आदयः कार्यकर्तारः उपस्थिताः आसन्।**